॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ५८

नरान्तकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋतर्षभाः ।
देवान्तकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः ॥ १॥

आरूढो मेघसङ्काशं वारणेन्द्रं महोदरः ।
वालिपुत्रं महावीर्यमभिदुद्राव वीर्यवान् ॥ २॥

भ्रातृव्यसनसन्तप्तस्तदा देवान्तको बली ।
आदाय परिघं दीप्तमङ्गदं समभिद्रवत् ॥ ३॥

रथमादित्यसङ्काशं युक्तं परमवाजिभिः ।
आस्थाय त्रिशिरा वीरो वालिपुत्रमथाभ्ययात् ॥ ४॥

स त्रिभिर्देवदर्पघ्नैर्नैर्ऋतेन्द्रैरभिद्रुतः ।
वृक्षमुत्पाटयामास महाविटपमङ्गदः ॥ ५॥

देवान्तकाय तं वीरश्चिक्षेप सहसाङ्गदः ।
महावृक्षं महाशाखं शक्रो दीप्तमिवाशनिम् ॥ ६॥

त्रिशिरास्तं प्रचिच्छेद शरैराशीविषोपमैः ।
स वृक्षं कृत्तमालोक्य उत्पपात ततोऽङ्गदः ॥ ७॥

स ववर्ष ततो वृक्षाञ्शिलाश्च कपिकुञ्जरः ।
तान्प्रचिच्छेद सङ्क्रुद्धस्त्रिशिरा निशितैः शरैः ॥ ८॥

परिघाग्रेण तान्वृक्षान्बभञ्ज च सुरान्तकः ।
त्रिशिराश्चाङ्गदं वीरमभिदुद्राव सायकैः ॥ ९॥

गजेन समभिद्रुत्य वालिपुत्रं महोदरः ।
जघानोरसि सङ्क्रुद्धस्तोमरैर्वज्रसंनिभैः ॥ १०॥

देवान्तकश्च सङ्क्रुद्धः परिघेण तदाङ्गदम् ।
उपगम्याभिहत्याशु व्यपचक्राम वेगवान् ॥ ११॥

स त्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत्समभिद्रुतः ।
न विव्यथे महातेजा वालिपुत्रः प्रतापवान् ॥ १२॥

तलेन भृशमुत्पत्य जघानास्य महागजम् ।
पेततुर्लोचने तस्य विननाद स वारणः ॥ १३॥

विषाणं चास्य निष्कृष्य वालिपुत्रो महाबलः ।
देवान्तकमभिद्रुत्य ताडयामास संयुगे ॥ १४॥

स विद्धलितसर्वाङ्गो वातोद्धत इव द्रुमः ।
लाक्षारससवर्णं च सुस्राव रुधिरं मुखात् ॥ १५॥

अथाश्वास्य महातेजाः कृच्छ्राद्देवान्तको बली ।
आविध्य परिघं घोरमाजघान तदाङ्गदम् ॥ १६॥

परिघाभिहतश्चापि वानरेन्द्रात्मजस्तदा ।
जानुभ्यां पतितो भूमौ पुनरेवोत्पपात ह ॥ १७॥

समुत्पतन्तं त्रिशिरास्त्रिभिराशीविषोपमैः ।
घोरैर्हरिपतेः पुत्रं ललाटेऽभिजघान ह ॥ १८॥

ततोऽङ्गदं परिक्षिप्तं त्रिभिर्नैर्ऋतपुङ्गवैः ।
हनूमानपि विज्ञाय नीलश्चापि प्रतस्थतुः ॥ १९॥

ततश्चिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा ।
तद्रावणसुतो धीमान्बिभेद निशितैः शरैः ॥ २०॥

तद्बाणशतनिर्भिन्नं विदारितशिलातलम् ।
सविस्फुलिङ्गं सज्वालं निपपात गिरेः शिरः ॥ २१॥

ततो जृम्भितमालोक्य हर्षाद्देवान्तकस्तदा ।
परिघेणाभिदुद्राव मारुतात्मजमाहवे ॥ २२॥

तमापतन्तमुत्पत्य हनूमान्मारुतात्मजः ।
आजघान तदा मूर्ध्नि वज्रवेगेन मुष्टिना ॥ २३॥

स मुष्टिनिष्पिष्टविकीर्णमूर्धा
निर्वान्तदन्ताक्षिविलम्बिजिह्वः ।
देवान्तको राक्षसराजसूनुर्
गतासुरुर्व्यां सहसा पपात ॥ २४॥

तस्मिन्हते राक्षसयोधमुख्ये
महाबले संयति देवशत्रौ ।

क्रुद्धस्त्रिमूर्धा निशिताग्रमुग्रं
ववर्ष नीलोरसि बाणवर्षम् ॥ २५॥

स तैः शरौघैरभिवर्ष्यमाणो
विभिन्नगात्रः कपिसैन्यपालः ।
नीलो बभूवाथ विसृष्टगात्रो
विष्टम्भितस्तेन महाबलेन ॥ २६॥

ततस्तु नीलः प्रतिलभ्य संज्ञां
शैलं समुत्पाट्य सवृक्षषण्डम् ।
ततः समुत्पत्य भृशोग्रवेगो
महोदरं तेन जघान मूर्ध्नि ॥ २७॥

ततः स शैलाभिनिपातभग्नो
महोदरस्तेन सह द्विपेन ।
विपोथितो भूमितले गतासुः
पपात वर्जाभिहतो यथाद्रिः ॥ २८॥

पितृव्यं निहतं दृष्ट्वा त्रिशिराश्चापमाददे ।
हनूमन्तं च सङ्क्रुद्धो विव्याध निशितैः शरैः ॥ २९॥

हनूमांस्तु समुत्पत्य हयांस्त्रिशिरसस्तदा ।
विददार नखैः क्रुद्धो गजेन्द्रं मृगराड् इव ॥ ३०॥

अथ शक्तिं समादाय कालरात्रिमिवान्तकः ।
चिक्षेपानिलपुत्राय त्रिशिरा रावणात्मजः ॥ ३१॥

दिवि क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसङ्गताम् ।
गृहीत्वा हरिशार्दूलो बभञ्ज च ननाद च ॥ ३२॥

तां दृष्ट्वा घोरसङ्काशां शक्तिं भग्नां हनूमता ।
प्रहृष्टा वानरगणा विनेदुर्जलदा इव ॥ ३३॥

ततः खड्गं समुद्यम्य त्रिशिरा राक्षसोत्तमः ।
निचखान तदा रोषाद्वानरेन्द्रस्य वक्षसि ॥ ३४॥

खड्गप्रहाराभिहतो हनूमान्मारुतात्मजः ।
आजघान त्रिमूर्धानं तलेनोरसि वीर्यवान् ॥ ३५॥

स तलाभिहतस्तेन स्रस्तहस्ताम्बरो भुवि ।
निपपात महातेजास्त्रिशिरास्त्यक्तचेतनः ॥ ३६॥

स तस्य पततः खड्गं समाच्छिद्य महाकपिः ।
ननाद गिरिसङ्काशस्त्रासयन्सर्वनैरृतान् ॥ ३७॥

अमृष्यमाणस्तं घोषमुत्पपात निशाचरः ।
उत्पत्य च हनूमन्तं ताडयामास मुष्टिना ॥ ३८॥

तेन मुष्टिप्रहारेण सञ्चुकोप महाकपिः ।
कुपितश्च निजग्राह किरीटे राक्षसर्षभम् ॥ ३९॥

स तस्य शीर्षाण्यसिना शितेन
किरीटजुष्टानि सकुण्डलानि ।
क्रुद्धः प्रचिच्छेद सुतोऽनिलस्य
त्वष्टुः सुतस्येव शिरांसि शक्रः ॥ ४०॥

तान्यायताक्षाण्यगसंनिभानि
प्रदीप्तवैश्वानरलोचनानि ।
पेतुः शिरांसीन्द्ररिपोर्धरण्यां
ज्योतींषि मुक्तानि यथार्कमार्गात् ॥ ४१॥

तस्मिन्हते देवरिपौ त्रिशीर्षे
हनूमत शक्रपराक्रमेण ।
नेदुः प्लवङ्गाः प्रचचाल भूमी
रक्षांस्यथो दुद्रुविरे समन्तात् ॥ ४२॥

हतं त्रिशिरसं दृष्ट्वा तथैव च महोदरम् ।
हतौ प्रेक्ष्य दुराधर्षौ देवान्तकनरान्तकौ ॥ ४३॥

चुकोप परमामर्षी महापार्श्वो महाबलः ।
जग्राहार्चिष्मतीं चापि गदां सर्वायसीं शुभाम् ॥ ४४॥

हेमपट्टपरिक्षिप्तां मांसशोणितलेपनाम् ।
विराजमानां वपुषा शत्रुशोणितरञ्जिताम् ॥ ४५॥

तेजसा सम्प्रदीप्ताग्रां रक्तमाल्यविभूषिताम् ।
ऐरावतमहापद्मसार्वभौम भयावहाम् ॥ ४६॥

गदामादाय सङ्क्रुद्धो महापार्श्वो महाबलः ।
हरीन्समभिदुद्राव युगान्ताग्निरिव ज्वलन् ॥ ४७॥

अथर्षयः समुत्पत्य वानरो रवणानुजम् ।
महापार्श्वमुपागम्य तस्थौ तस्याग्रतो बली ॥ ४८॥

तं पुरस्तात्स्थितं दृष्ट्वा वानरं पर्वतोपमम् ।
आजघानोरसि क्रुद्धो गदया वज्रकल्पया ॥ ४९॥

स तयाभिहतस्तेन गदया वानरर्षभः ।
भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु ॥ ५०॥

स सम्प्राप्य चिरात्संज्ञामृषभो वानरर्षभः ।

क्रुद्धो विस्फुरमाणौष्ठो महापार्श्वमुदैक्षत ॥ ५१ ॥

तां गृहीत्वा गदां भीमामाविध्य च पुनः पुनः ।
मत्तानीकं महापार्श्वं जघान रणमूर्धनि ॥ ५२ ॥

स स्वया गदया भिन्नो विकीर्णदशनेक्षणः ।
निपपात महापार्श्वो वज्राहत इवाचलः ॥ ५३ ॥

तस्मिन्हते भ्रातरि रावणस्य
तन्नैरृतानां बलमर्णवाभम् ।
त्यक्तायुधं केवलजीवितार्थं
दुद्राव भिन्नार्णवसंनिकाशम् ॥ ५४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com